Roll No.
रोल नं.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

Code No. **102**

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

# SANSKRIT
# संस्कृतम्

***General Instructions :***

***सामान्य निर्देश :***

***Read the following instructions very carefully and strictly follow them.***

***निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।***

*Time allowed : 3 hours* | *Maximum marks : 80*

*निर्धारितः समय :* होरात्रयम् | पूर्णाङ्काः *80*

***Note / नोट :***

(i) *Please check that this question paper contains **8** printed pages.*

*कृपया जाँच कर लें कि इस प्रश्न-पत्र में 8 मुद्रित पृष्ठ हैं।*

(ii) *Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.*

*प्रश्न-पत्र में दाहिनी ओर दिए गये कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।*

(iii) *Please check that this question paper contains **14** questions.*

*कृपया जाँच कर लें कि इस प्रश्न-पत्र में **14** प्रश्न हैं।*

(iv) ***Please write down the Serial Number of the question in the answer-book before attempting it.***

***कृपया प्रश्न के उत्तर लिखना आरम्भ करने से पहले, उत्तर-पुस्तिका में प्रश्नों के क्रमाङ्क अवश्य लिखें।***

(v) ***15** minutes time has been allotted to read this question paper. The question paper distributed at **10.15** a.m. From **10.15** a.m. to **10.30** a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.*

*इस प्रश्न–पत्र को पढ़ने के लिए **15** मिनट का समय दिया गया है। प्रश्न–पत्र का वितरण पूर्वाह्न में **10.15** बजे किया जायेगा। पूर्वाह्न में **10.15** बजे से **10.30** बजे तक छात्र केवल प्रश्न–पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर–पुस्तिका में कोई उत्तर नहीं लिखेंगे।*

(vi) ***All** questions are **compulsory**.*

***सभी** प्रश्न **अनिवार्य** हैं।*

**Part – A/खण्डः – क**

(vii) *Question No. **1** is an optional question. **5** marks alloted for this. Choose the **correct** option.*

*प्रश्न संख्या **1** विकल्पात्मक प्रश्न है। इसके **5** अङ्क निर्धारित हैं। **सही** विकल्प को चुनें।*

(viii) *Question No. **2** carry **5** marks, Q. No. **3** carry **5** marks and Q. No. **4** carry **5** marks. Q.No. **5** carry **10** marks, Q.No. **6** carry **20** marks.*

*प्रश्न संख्या **2** के लिए **5** अङ्क, प्रश्न संख्या **3** के लिए **5** अङ्क तथा प्रश्न संख्या **4** के लिए **5** अङ्क निर्धारित हैं। प्रश्न संख्या **5** के लिए **10** अङ्क, प्रश्न संख्या **6** के लिए **20** अङ्क निर्धारित हैं।*

**Part – B/खण्डः – ख**

*Q. No. **7** carry **5** marks, Q.No. **8** carry **4** marks, Q.No. **9** carry **4** marks, Q.No. **10** carry **4** marks, Q.No. **11** carry **4** marks, Q.No. **12** carry **3** marks, Q.No. **13** carry **4** marks and Q.No. **14** carry **2** marks.*

*प्रश्न संख्या **7** के लिए **5** अङ्क, प्रश्न संख्या **8** के लिए **4** अङ्क, प्रश्न संख्या **9** के लिए **4** अङ्क, प्रश्न संख्या **10** के लिए **4** अङ्क, प्रश्न संख्या **11** के लिए **4** अङ्क, प्रश्न संख्या **12** के लिए **3** अङ्क, प्रश्न संख्या **13** के लिए **4** अङ्क तथा प्रश्न संख्या **14** के लिए **2** अङ्क निर्धारित हैं।*

## खण्डः – क

**1.** अधोलिखितानां प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत – (केवलं पञ्चानामेव) **5x1=5**

(i) 'आत्मनश्च' अस्मिन् सूत्रे आत्मनः शब्दे विभक्तिवचनं किम् ?

(अ) पञ्चमी एकवचनम् (ब) चतुर्थी एकवचनम्

(स) द्वितीया एकवचनम् (द) तृतीया एकवचनम्

(ii) 'कारनाम्नि च प्राचां हलादौ' अत्र 'हलादौ' शब्दे कः समासः ?

(अ) द्वन्द्वः (ब) कर्मधारयः

(स) बहुव्रीहिः समासः (द) अव्ययीभावः

(iii) 'पूर्वपदात् संज्ञायामगः' अनेन सूत्रेण संज्ञायां विषये पूर्वपदस्यान्निमित्तादुत्तरस्य नकारस्य कः आदेशो भवति ?

(अ) लकारस्य (ब) णकारादेशः

(स) पकारस्य (द) सकारस्य

(iv) 'बहुलं छन्दस्यमाङ्-योगेऽपि' अत्र रेखाङ्कितपदस्य सन्धिविच्छेदं कुरुत –

(अ) छन्दसी + यमाङ् (ब) छन्दः + यमाङ्

(स) छन्दसि + यमाङ् (द) छन्दसि + अमाङ्

(v) 'रुट्' आगमः केन सूत्रेण भवति ?

(अ) आत्मनेपदेष्वनतः (ब) बहुलं छन्दसि

(स) औङ आपः (द) शीङो रुट्

(vi) 'समर्णः' इति कस्य सूत्रस्य उदाहरणम् ?

(अ) अभेश्चाविदूर्ये (ब) अर्देः सन्निविभ्यः

(स) णेरध्ययने वृत्तम् (द) दृढः स्थूलबलयोः

(vii) 'द्विवार्षिकः' इत्युदाहरणे वृद्धिसूत्रं किम् ?

(अ) वर्षस्याभविष्यति (ब) दीर्घाच्च वरुणस्य

(स) आतो युक् चिण् कृतोः (द) ठस्येकः

**2.** सत्यासत्यविवेचनं कुरुत –(पञ्चानामेव) **5x1=5**

(i) घेरुत्तरस्य आङो ना इत्ययमादेशो भवति, अस्त्रियाम्।

(ii) 'जिघ्रतेर्वा' इति सूत्रेण इकारादेशो विकल्पेन न भवति।

(iii) घुसंज्ञकस्य दा इत्येतस्य स्थाने 'दद्' इत्ययमादेशो भवति, तकारादौ किति प्रत्यये परतः।

(iv) 'तस्य परमाम्रेडितम्' इति सूत्रं वृद्धिसूत्रम् अस्ति।

(v) 'यद्धितुपरं छन्दसि' इति सूत्रे 'यद्धितुपरम्' इति पदे बहुव्रीहिः समासो वर्तते।

(vi) झय् प्रत्याहारान्ताद् उत्तरस्य 'मतुप्' स्थाने वकारादेशो भवति।

3. मञ्जूषाया: पदं चित्वा रिक्तस्थानानि पूरयत – (पञ्चानामेव) 5x1=5

(i) पदान्ते झलि च परतो य: संयोगस्तदाद्यो: __________भवति।

(ii) पुम् इत्येतस्य __________ भवति अम्परे खयि परत: संहितायाम्।

(iii) डकारान्तात् पदादुत्तरस्य सकारस्य वा __________ आगमो भवति।

(iv) स्यश्च सन् च स्यसनौ तयो: __________।

(v) एकोऽच् यस्मिन् स एकाच् __________।

(vi) स्तोकादिभ्य: परस्या: पञ्चम्या __________ भवति।

(vii) सकारतवर्गयो: षकारटवर्गाभ्यां योगे __________ आदेशौ भवत:।

| मञ्जूषा |
|---|
| षकारटवर्गौ, रु:, सकारककारयोर्लोप:, धुट् , बहुव्रीहि:, इतरेतरद्वन्द्व:, अलुग्। |

4. समुचितं मेलनं कुरुत – (पञ्चानामेव) 5x1=5

| | |
|---|---|
| (i) उषासोषस: | (क) नकारस्य लोप: |
| (ii) श्नान्नलोप: | (ख) विसर्जनीयादेश: |
| (iii) गो: पादान्ते | (ग) उषासा आदेश: |
| (iv) निर: कुष: | (घ) नुडागम: |
| (v) अचि विभाषा | (ङ) इडागम: |
| (vi) रो: सुपि | (च) लकारादेश: |
| (vii) मातृपितृभ्यां स्वसा | (छ) णकारादेश: |
| (viii) अनितेरन्त: | (ज) मूर्धन्यादेश: |

5. पदच्छेद – विभक्तिवचनसहितं सूत्रार्थं लिखत – (पञ्चानामेव) 5x2=10

(i) घकालतनेषु कालनाम्न:। (ii) अत्वसन्तस्य चाधातो:।

(iii) तप्तनप्तनथनाश्च। (iv) आर्धधातुकस्येड् वलादे:।

(v) आतो युक् चिण्कृतो:। (vi) एतेर्लिङि।

(vii) लोपे विभाषा। (viii) ससजुषो रु:।

(ix) ढोढे लोप:। (x) पानं देशे।

6. चत्वार: शब्दा: साधनीया:। 4x5=20

(i) मातापितरौ (ii) देदीयते

(iii) जहाहि (iv) विद्वान्

(v) संस्कर्त्ता (vi) अजर्घा:

## खण्डः – ख

## अपठितावबोधनम्

**7.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **5**

महाभारते व्यासः धर्मं शाश्वतम् अकथयत्–अतः जनैः लोभेन भयेन वा धर्मः न परित्याज्यः। महाभारतं वस्तुतः कौरवपाण्डवयोः युद्धस्य वर्णनमेव न चित्रयति अपितु प्रत्येकं वीरस्य वीरगाथा अत्र कथारूपेण वर्णिता वर्तते। भगवतः श्रीकृष्णस्य सार्थित्वे अर्जुनः एकाकी एव अनेकान् जयति। युद्धे पात्रयोः संवादः यदा–कदा एकम् उपाख्यानं भवति। अस्य अंशः गीतानाम्ना अस्मिन् विश्वे प्रतिष्ठितः। दैव्यः आसूर्यः सम्पदः अपि पृथक् कथिताः अत्र। महाभारतस्य सर्वाधिकं प्रमुखं पात्रं भीष्मः अपि वर्तते।

**प्रश्नाः**

(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) **2x½=1**

(i) महाभारते कः धर्मं शाश्वतम् अकथयत्?

(ii) महाभारतं कयोः युद्धस्य वर्णनं चित्रयति?

(iii) महाभारते सर्वाधिकं प्रमुखं पात्रं कः?

(आ) पूर्णवाक्येन उत्तरत – **1x1=1**

(i) जनैः केन धर्मः न परित्याज्यः?

(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत – **1x1=1**

(ई) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) **2x1=2**

(i) 'व्यासः' इति कर्तृपदस्य क्रियापदम् चिनुत –

(क) चित्रयति (ख) अकथयत्

(ग) वर्तते (घ) प्रतिष्ठितः

(ii) "वार्तालापः" इति पदस्य पर्याय पदं चिनुत –

(क) धर्मः (ख) भगवतः

(ग) संवादः (घ) दैव्यः

(iii) 'नश्वरम्' इति पदस्य विलोमपदं चिनुत –

(क) शाश्वतम् (ख) वर्णनम्

(ग) सम्पदः (घ) उपाख्यानम्

## रचनात्मकं कार्यम्

8. मञ्जूषाप्रदत्त – शब्दानां साहाय्येन अधः प्रदत्तं चित्रम् आधृत्य त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत – **4**



| मञ्जूषा |
|---|
| कारयानानि, चतुष्पथस्य, बसयानानि, दृश्यम्, अस्ति, जनाः, न,पालयन्ति, व्याकुलाः, दृश्यन्ते, अनुशासनम्, अवरुद्धः, मार्गः, अस्त-व्यस्तः, द्विचक्रिका, पदातिजनाः, गन्तुं, अक्षमाः। |

**अथवा**

अधः प्रदत्तविषयमाधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः शब्दैः अनुच्छेदमेकं मञ्जूषाप्रदत्तशब्दानां सहायतया लिखत – **4**

**विषय :–'स्वास्थ्यम्'**

| मञ्जूषा |
|---|
| हितकरम्, पथ्यं, व्यायामः, भ्रमणम्, प्रातःकाले, आसनानि, भोजनम्, धनम्, सन्तुलितम्, सूर्यनमस्कारः, पौष्टिकम्, सूर्यास्तपूर्वम्, समयेन, जागरणम्, स्वप्नम्, प्रतिदिनम्, स्वास्थ्यं, सर्वोत्तमम्। |

## पठितावबोधनम्

**9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत् –** **4**

वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह – त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद्विधेयम्। पुन: वत्सराज: राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराज: भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोज: किमपि वत्सराजं कथितवान् ,तद्वचनै: वैराग्यमापन्नो वत्सराज: तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष। पुन: कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह – श्रीमता यथादिष्टं तत्साधितम् इति। ततो राजा भोजवधं ज्ञात्वा तं पृष्टवान् – वत्सराज! खड्गप्रहारसमये तेन किमुक्तम् ?

वत्सराजेन च राज्ञे भोजस्य अन्तिमसन्देशरूपेण तत्प्रदत्त: श्लोक: समर्पित:।

**प्रश्ना :**

(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) **2x½=1**

(i) त्वं मम क: असि?

(ii) कस्य वचनम् आकर्ण्य कुपितो राजा प्राह?

(iii) वत्सराजेन अन्तिमसन्देशरूपेण तत्प्रदत्त: क: समर्पित: ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम्) **1x1=1**

(i) वत्सराज: भोजं रथे निवेश्य कुत्र नीतवान्?

(ii) राजा भोजवधं ज्ञात्वा वत्सराजं किं पृष्टवान्?

(इ) यथानिर्देशमुत्तरत – (केवलं प्रश्नद्वयम्) **2x1=2**

(i) 'दिने' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(ii) 'नीतवान्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(iii) 'कुपित:' इति पदस्य विशेष्यपदं किं प्रयुक्तम्?

(iv) 'त्वम्' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम्?

**10.** अधोलिखितं श्लोकं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत – **4**

कर्णामृतं सूक्तिरसं विमुच्य,
दोषेषु यत्न: सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य,
क्रमेलक: कण्टकजालमेव ।।

**प्रश्ना:**

(अ) एकपदेन उत्तरत – **2x½=1**

(i) केषां यत्न: दोषेषु भवति?

(ii) खल: कीदृशं सूक्तिरसं विमुञ्चति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम्) **1x1=1**

(i) किं विमुच्य खलानां यत्न: दोषेषु भवति?

(ii) क्रमेलक: केलिवनं प्रविश्य किं निरीक्षते?

(इ) यथानिर्देशमुत्तरत – (केवलं प्रश्नद्वयम्) **2x1=2**

(i) 'यत्नः सुमहान्' इति अनयोः पदयोः विशेषणपदं किम् ?

(ii) 'सज्जनानाम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

(iii) 'त्यक्त्वा' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**11.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं मञ्जूषायाः शुद्धम् अर्थं चित्वा लिखत – **4x1=4**

(i) यानि अनवद्यानि कर्माणि।

(ii) रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्।

(iii) त्वादृशा एव वस्तुतः पुरस्कार-भाजनानि भवन्ति।

(iv) मत्कृते आवश्यकता नास्ति अवलम्बनस्य।

| **मञ्जूषा** |
|---|
| लक्ष्मणेन, अनिन्द्यानि, सहायतायाः, पात्राणि |

## संस्कृतसाहित्यपरिचयः

**12.** अधोलिखितानां प्रश्नानामुत्तराणि लिखत –(केवलं प्रश्नत्रयम्) **3x1=3**

(i) 'मदालसा' इति पाठस्य लेखिका का ?

(ii) ''दौवारिकस्य निष्ठा'' पाठस्य लेखकः कः ?

(iii) ''प्रजानुरञ्जको नृपः'' इति पाठः कस्मात् ग्रन्थात् संगृहीतः ?

(iv) 'अनुशासनम्' इति पाठः कस्मात् उपनिषदः संगृहीतः ?

**13.** यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत – (केवलं प्रश्नचतुष्टयम्) **4x1=4**

(i) काव्येषु __________ रम्यम्। (चम्पूः/नाटकम्)

(ii) गद्यपद्यमयी रचना __________ अभिधीयते। (चम्पूः/गद्यम्)

(iii) रूपकस्य __________ भेदाः सन्ति। (अष्ट/दश)

(iv) नाट्यशास्त्रस्य प्रणेता __________ अस्ति। (भरतमुनिः / कालिदासः)

(v) छन्दोरहितं काव्यं __________ कथ्यते। (पद्यम् /गद्यम्)

**14.** समुचितं मेलनं कुरुत – **4x½=2**

| | |
|---|---|
| (i) नान्दी | (अ) भरतवाक्यम् |
| (ii) नाटकस्य अन्ते | (ब) कथा आख्यायिका च |
| (iii) छन्दोयुक्तम् | (स) नाटकस्य आरम्भे |
| (iv) गद्यस्य भेदद्वयम् | (द) पद्यम् |

-oOo-